श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुन्दरराजाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुन्दरराजाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीमद्वृषभशैलेन्द्रनित्यवासकृतादरम्।
श्रीनिवासाच्युतानन्तगोविन्दाद्ययुताभिधम्॥ 1 ॥

दिव्यौषधीवृताऽरामवनाचलनिकेतनम्।
पारम्यसाम्यविरमपरमस्वामिसंज्ञकम्॥ 2 ॥

सर्वलोकैकसौन्दर्यभवनीकृतविग्रहम्।
वैकर्तनतपोयोगप्रेमपुण्यफलोदयम्॥ 3 ॥

प्रदीपपादपप्रान्तसोमच्छन्दरथस्थितम्।
सुपर्णद्वयसञ्जुष्टसुपर्णविजयध्वजम्॥ 4 ॥

स्वमञ्जीरगलत्पुण्यमञ्जीरतटिनीस्थितम्।
सहस्रदलपद्मस्थसहस्रदलपद्युगम्॥ 5 ॥

रमाविश्वम्भराश्लिष्टपार्श्वद्वन्द्वमनोहरम्।
सुतपानामविप्रेन्द्रचातकाम्बुदमण्डलम्॥ 6 ॥

दुर्वासश्शापनिर्मुक्तमण्डूकमुनिपूजितम्।
पर्वतध्वजपाण्ड्येन्द्रपरार्थपदपङ्कजम्॥ 7 ॥

विमानवामपार्श्वस्थक्षेत्रपालनिषेवितम्।
श्रीमत्सुन्दरराजाख्ययाथार्थ्यद्योतिताऽकृतिम्॥ 8 ॥

तप्तकाञ्चनसङ्काशचारुपीताम्बरावृतम्।
सजीवदिव्यशस्त्रास्त्रसमारूढकटीतटम्॥ 9॥

नीलनीरदमध्यस्थतटिदाभोपवीतिनम्।
भार्गवीभवनाम्भोजभवनीकृतवक्षसम्॥ 10॥

भ्रमद्भ्रमरसङ्घुष्टवनमालाविभूषितम्।
श्रीकौस्तुभमहारत्नपरिशोभितकन्धरम्॥ 11॥

मन्दारविटपाकारबाहुदण्डोपशोभितम्।
शङ्खचक्रगदाखड्गशार्ङ्गचापवरायुधम्॥ 12॥

उद्योगचक्रविलसद्वामेतरकराम्बुजम्।
निनदद्दक्षिणावर्तदक्षिणेतरपाणिनम्॥ 13॥

अशेषलोकवरदकटिन्यस्तकरद्वयम्।
दोर्दण्डषण्डमध्यस्थतारहारलतान्वितम्॥ 14॥

पद्मचन्द्रामृतरसप्रबुद्धमुखमण्डलम्।
जपाकुसुमसङ्काशविद्रुमाधरपल्लवम्॥ 15॥

नितान्तदीर्घललितशफरद्वन्द्वलोचनम्।
नयनाम्बुधिमध्यस्थसेतुभूतसुनासिकम्॥ 16॥

मनोभवमहेष्वासनमितभ्रूयुगोज्वलम्।
फुल्लपङ्केरुहासीनमधुपायितपुण्ड्रकम्॥ 17॥

अर्धेन्दुललितोदारफालस्थलमनोहरम्।
अराळनीलतरळमञ्जुळाळकमञ्जुळम्॥ 18॥

स्मितज्योत्स्नापरीवाहमज्जन्नीलाचलद्युतिम्।
बालार्कशतसाहस्रकिरीटमकुटान्वितम्॥ 19॥

देदीप्यमानकटककुण्डलाङ्गदभासुरम् ।
नानामणिगणज्वालाशबळीकृतविग्रहम् ॥ 20 ॥

श्रीमत्कल्याणसौन्दर्यवल्लीचित्तानुवर्तिनम् ।
वेदवेदाङ्गतत्वज्ञविशुद्धमतिगोचरम् ॥ 21 ॥

शरणागतसन्त्राणकरुणावरुणालयम् ।
दुर्वाराश्रितदारिद्र्यबिलेशयखगेश्वरम् ॥ 22 ॥

पादाननभुजाक्ष्यादिसर्वावयवसुन्दरम् ।
स्वाराधनासक्तचित्तभक्तसंरक्षणोत्सुकम् ॥ 23 ॥

विखनोमुनिसिद्धान्तसमर्चैकप्रियाशयम् ।
प्रणतार्तिप्रणाशैकधुरन्धरवनाद्रिगम् ॥ 24 ॥

धाराधरावृताऽरामधराधरधराधरम् ।
अकारादिक्षकारान्तमातृकातारकात्मकम् ॥ 25 ॥

ध्रुवचन्द्रदिवानाथमध्यमण्डलवर्तिनम् ।
नारदव्याससनकशुकादिहृदयेशयम् ॥ 26 ॥

देवदानवगन्धर्वसिद्धसङ्घाभिवन्दितम् ।
अनुक्षणसमारूढलक्ष्मीसंज्ञाविराजितम् ॥ 27 ॥

अनेकाचरसञ्चारभुवनागारशिल्पिनम् ।
ब्रह्मरुद्रेन्द्रसङ्घुष्टमहाविभवविस्तरम् ॥ 28 ॥

पारावारविहारोद्यन्महामत्स्यावतारिणम् ।
मधुकैटभदावाग्निप्रशमप्रवराम्बुदम् ॥ 29 ॥

संवर्तसलिलाऽवर्तसमुद्धृतसरस्वतिम् ।
अशेषभुवनाऽधारधरणीधरधारिणम् ॥ 30 ॥

क्षीराब्धिमन्थनीमन्थमन्दराऽधारकच्छपम्।
सागरोत्पादिताब्जाऽदिगजरामामणिद्रुमम्॥ 31॥

सुधाहेतुकदैत्यारिदैत्योग्रकलहास्पदम्।
मोहिताशेषभुवनमोहिनीरूपधारिणम्॥ 32॥

सुरासुरसुधादानप्रियविप्रियकारिणम्।
सूकराकारहुङ्कारनिराकृतपराकृतिम्॥ 33॥

धुतस्कन्धसटालग्ननक्षत्रग्रहमण्डलम्।
हिरण्याक्षघनध्वान्तकबळीकरभास्करम्॥ 34॥

स्वाङ्कसंस्थापितानन्तानन्ततत्वार्थदर्शिनम्।
श्रीमदष्टार्णविलसत्प्रह्लादहृदयालयम्॥ 35॥

हिरण्यसदनद्वारनिर्भिन्नस्तम्भसम्भवम्।
कठोरगर्जनध्वानभीतभीतजगत्रयम्॥ 36॥

स्वघोरवज्रनखरविभिन्नशरभाकृतिम्।
दैत्यश्रीहरणासक्तकुहनाब्रह्मचारिणम्॥ 37॥

त्रिविक्रमक्रमाऽक्रान्तसमस्तभुवनक्रमम्।
सर्वगीर्वाणसामन्तसार्वभौमसहोदरम्॥ 38॥

भार्गवार्णवसम्भूतनिष्कळङ्कनिशाकरम्।
स्वतेजोलवदन्दग्धकार्तवीर्यमहावनम्॥ 39॥

क्षत्रियक्षतजासिक्ततीक्ष्णधारापरश्वधम्।
सौरवंशसमुत्पन्नहरिन्मणिवरोत्तमम्॥ 40॥

महानटमहेष्वासभग्नप्राप्तजयश्रियम्।
जानकीचारुवदनचकोरशशलाञ्छनम्॥ 41॥

निर्जितानेकसाहस्रमीनकेतनसुन्दरम् ।
उद्यदुत्फुल्लचन्द्राब्जस्फुरन्नीलाचलोपमम् ॥ **42** ॥

प्रपन्नापन्नसम्पन्नकरणैकपरायणम् ।
शरशोषितसर्वस्वसमुद्रतरणोद्यतम् ॥ **43** ॥

दुष्टेष्टाऽशरकीशेशनिग्रहानुग्रहप्रदम् ।
भरताङ्गदभल्लूकसौरवायुसुताऽवृतम् ॥ **44** ॥

वसिष्ठवामदेवादिब्रह्मर्षिगणमानितम् ।
क्षमावात्सल्यकारुण्याद्युदारगुणवारिधिम् ॥ **45** ॥

शरदिन्दुसुधाशङ्खशुद्धस्फटिकविग्रहम् ।
कोपाऽटोपहलाऽकृष्टयमुनाहस्तिनापुरम् ॥ **46** ॥

गान्धारकर्णगाङ्गेयसुयोधनमुखार्चितम् ।
यशोदादेवकीनन्दवसुदेवयशोदयम् ॥ **47** ॥

गोपीगोपालगोबृन्दगोवर्धनधरोद्धरम् ।
बृन्दावनान्तविहरद्गोपीनयनकिङ्करम् ॥ **48** ॥

चिन्तयन्तीकुचेलादिचिन्तितार्थबहुप्रदम् ।
तृणीकृताश्ववृषभतृणाऽवर्तमदोत्कटम् ॥ **49** ॥

काळीयकंसनरकबकबाणेशभञ्जनम् ।
क्रन्दत्पाञ्चालतनयादुःखोन्मूलनसम्भ्रमम् ॥ **50** ॥

उद्धवाक्रूरविदुरभीष्मपाण्डवसेवितम् ।
रुक्मिणीसत्यभामादिस्त्रैणदृष्टिमनोहरम् ॥ **51** ॥

महाभारतशार्दूलविजयप्रियसारथिम् ।
धनञ्जयाद्रिगीतार्थसुधावर्षिमहाघनम् ॥ **52** ॥

समस्तविद्याभवनतुरङ्गमवराननम्।
हेषात्रयीमहाघोषचन्द्रमण्डलमन्दुरम् ॥ **53** ॥

निगमाऽगमशास्त्रादिसर्ववागीश्वरेश्वरम्।
स्वांशावतारबाहुल्यसंरक्षितजगत्त्रयम् ॥ **54** ॥

श्रीमदाऽरामजीमूतप्रख्यातनगपुङ्गवम्।
अणिमाद्यष्टसंसिद्धयमाद्यष्टाङ्गसिद्धिदम् ॥ **55** ॥

श्रीमद्वृषाद्रिनिलयं श्रीनिवासाभिधानकम्।
नरनारायणाऽख्यातहंसहंसोत्तमेश्वरम् ॥ **56** ॥

श्रीमद्वृषाद्रिनिलयं श्रीमद्वेङ्कटनायकम्।
श्रीमत्कुञ्जरराजेन्द्रवरदं प्रणमाम्यहम् ॥ **57** ॥

समस्तजगदाधारं सर्वमङ्गळदायकम्।
सर्वलोकैकशरणं वरदं प्रणमाम्यहम् ॥ **58** ॥

सर्वारिष्टविनाशार्थं सर्वाऽपद्विनिवृत्तये।
श्रीविष्णुभक्तिलाभाय मायासन्तारणाय च ॥ **59** ॥

सर्वसम्पत्समृध्यर्थमायुरारोग्यवृद्धये।
सत्कळत्रगृहक्षेत्रपुत्रमित्रादिवृद्धये ॥ **60** ॥

सुन्दरं परमन्देवं देवीं कल्याणसुन्दरीम्।
नमामि भूयोभूयोऽहं भूयोभूयो नमाम्यहम् ॥ **61** ॥

इति स्तुत्वा दिने रात्रौ सर्वसिद्धिं लभेन्नरः ॥ **62** ॥

॥ इति श्री सुन्दरराजाष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥